International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 82-84
© 2019 IJSR
www.anantaajournal.com
Received: 12-11-2018
Accepted: 23-12-2018

**Dr. Rajeev PP**
Associate Professor,
Department of Sanskrit,
Vyakarana Govt. Sanskrit
College, Tripunithura
Ernakulam, Kerala, India

**Correspondence**
**Dr. Rajeev PP**
Associate Professor,
Department of Sanskrit,
Vyakarana Govt. Sanskrit
College, Tripunithura
Ernakulam, Kerala, India

# वैयाकरणमतमनुसृत्य प्रतिभास्वरूपविचारः

**Dr. Rajeev PP**

**DOI:** https://doi.org/10.22271/23947519.2019.v5.i1a.1693

**उपक्रमः**

भारतीयकाव्यशास्त्रकारैः काव्यरचनायाः प्रतिभा, व्युत्पत्तिः, अभ्यासश्च इति त्रयो हेतवः उक्ताः। तेषु काव्यरचनां प्रतिभावानेव कविः कर्तुं क्षमते इति भामहः अभिप्रैति। [1] स्वाभाविकी प्रतिभा, प्रचुरमध्ययनमभ्यासनैरन्तर्यञ्चेति त्रीणि तत्त्वानि काव्यहेतवो भवन्ति इति दण्डिना उच्यते। [2] एवं काव्यरचनायाः हेतुः केवलं प्रतिभैव वर्त्तते इति जगन्नाथपण्डितः [3], राजशेखरः [4] च प्रतिपादयितः। एते आचार्याः व्युत्पत्तेः अभ्यासस्य च अपेक्षया प्रतिभा एव काव्यहेतुः इति विश्वसन्ति। किन्तु काव्यरचनायां व्युत्पत्तेः अभ्यासस्य च आवश्यकता नास्तीति अभिप्रायः तेषां नास्ति। अर्थात् काव्यरचनायाः प्रधानहेतुः यद्यपि प्रतिभा भवति तथापि तस्याः सहायकहेतुरूपेण व्युत्पत्त्यभ्यासौ अपि स्वीकर्तव्यौ इति तेषामभिप्रायः वर्त्तन्ते।।

सहजा, उत्पाद्या इति द्वौ प्रतिभाभेदौ स्तः इति रुद्रटाचार्यः [5] अभिप्रैति। रुद्रटाचार्यस्याभिप्रायमङ्गीकुर्वता हेमचन्द्रेणापि [6] उत्पाद्या, औत्पादिकी इति भेदौ प्रदर्शितौ। प्रतिभाभेदानधिकृत्य विशदरूपेण पठनं कुर्वत्सु प्रमुखः आसीत् राजशेखरः। तस्य मते प्रतिभायाः प्रथमं द्वौ भेदौ स्तः:- कारयित्री प्रतिभा, भावयित्री प्रतिभा च। अत्र काव्यकारणसमर्था कविप्रतिभा भवति कारयित्री प्रतिभा। काव्यसमीक्षकाः पाठकाः यया प्रतिभया कवेरभिप्रायमभिगन्तुं शक्ताः भवन्ति सा भावयित्री प्रतिभा भवति। एतयोः कारयित्री प्रतिभा- सहजा, आहार्या, औपदेशिकी इति त्रिविधा भवन्ति। या प्रतिभा पूर्वजन्मसंस्कारानपेक्षते, एवम् अल्पेनैव अभ्यासेन उद्बुद्ध्यते सा सहजा प्रतिभा भवति। या प्रतिभा जन्मान्तरसंस्कारांस्त्वपेक्षते एवम् उद्बोधनाय अधिकः अभ्यासः अपेक्षते सा आहार्या प्रतिभा भवति। एवं या प्रतिभा मन्त्रतन्त्रादीनामुपदेशेनोद्भवति सा औपदेशिकी प्रतिभा भवति।।

अत्रेदमस्माभिः अवगन्तव्यं यत् केषाञ्चनाचार्याणां मते प्रतिभा नाम प्रज्ञा भवति। अतः प्रतिभा, प्रज्ञा इति पदद्वयं समानार्थकम् अथवा पर्यायवाचि चेति कथने दोषो नास्ति। वस्तुतः कवेः बुद्धिरेव प्रतिभा, प्रज्ञा इति पदद्वयेनोद्दिश्यते। सा च बुद्धिः त्रिविधा भवतीति राजशेखरः अभिप्रैति- स्मृतिः, मतिः, प्रज्ञा इति। एतेषु व्यतीतार्थतस्मारिका बुद्धिः स्मृतिरिति, वर्त्तमानार्थबोधिका बुद्धिः मतिरिति, भविष्यत्कालार्थदर्शिका बुद्धिः प्रज्ञा इति च उच्यते [7]।।

वैयाकरणानां मते प्रतिभा।

वैयाकरणानां मते प्रतिभा नाम वाक्यार्थः भवति। तदुक्तं नागेशभट्टेन वैयाकरणसिद्धान्तलघुमञ्जूषायाम्- ''वाक्यार्थश्च प्रतिभामात्रविषयः। प्रतिभा च जन्मान्तरसंस्कारजाऽपि। यथा मणौ पिकस्य पञ्चमस्वरविरावो जन्मान्तरसंस्कारजः। प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थ इति व्यवहार इत्यलम् [8]।'' इति। अयं सिद्धान्तः हरेः मतमनुसृत्यैव नागेशभट्टेन प्रतिपादितः। सा च प्रतिभा पदार्थव्यतिरिक्ता असत्यैः पदार्थैः एव उपाधिभूतैः अभिव्यज्यते। वस्तुतः शब्दशक्तिः यदा यदा यां यां प्रतिभां जनयति तदा तदा विश्वं विविधं विवर्त्तते परिणमते च। 'मृदियम्' 'घटोऽयम्' इत्यादौ रूपभेदे परमार्थतः पृथ्वीं प्रति शब्दशक्तिजनिता प्रतिभैव कारणम्, उतापि 'पृथ्वीयम्', 'तेज इदम्' इत्यादौ अपि परमतत्त्वं (शब्दतत्त्वम्) प्रति पृथ्वीति शब्दशक्तिजनिता प्रतिभैव तादृशभेदस्य हेतुः। तदुक्तं भर्तृहरिणा-

''विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्'' [9] इति।

एवं च सर्वेषाम् अर्थानां रूपभेदेन विच्छेदः प्रतिभात्मक एव, तस्य विच्छेदस्य प्रधानभूता प्रवर्त्तिका तु शब्दानां शक्तिरेव।।

प्रतिभाद्वारा पदानि वाक्यानि च सफलानि भवन्ति। अत एव 'देवदत्त गामभ्याज शुक्लां दण्डेन' इति वाक्यात् विच्छिन्नोपस्थितैः असत्यैः देवदत्तादिपदार्थैः प्रतिभायाः अभिव्यक्तिः भवति। अतः वैयाकरणानां मते प्रतिभारूपेण उपाधिना अभिव्यञ्जितः भवति वाक्यार्थः।

एवं यथा द्राक्षा-मधु-सित-शर्करादीनां मधुरत्वभेदाः स्वयं ज्ञातुं शक्यन्ते अन्यान् प्रति आख्यातुं न शक्यन्ते तथा इयं प्रतिभा अपि स्वसंवेदनसिद्धा चेदपि अन्यान् प्रति 'इदं तदित्येवम्' इति आख्यातुम् अशक्या भवति। किन्तु इयं प्रतिभा फलमुखेन आश्रयमुखेन अभिव्यञ्जकमुखेन च निरूपयितुं शक्यते एव। वह्नौ दाहानुकूला शक्तिरस्ति। एवं यथा इयं च वह्निनिष्ठा शक्तिः फलमुखेन आश्रयमुखेन अभिव्यञ्जकमुखेन च निरूपयितुं शक्यते तथा प्रतिभाऽपि निरूपयितुं शक्यते । एतस्मात् वाक्यं प्रतिभायाः जनकत्वेन आश्रयः, पदार्थाष्च पदोपस्थिताः तस्याः प्रतिभायाः अभिव्यञ्जकाः भवन्तीति सिद्ध्यति॥

सर्वेषां प्राणिनां इतिकर्तव्यतारूपव्यवहारस्य हेतुः प्रतिभा भवति। सा च प्रतिभा मनुष्याणं शक्तिग्रहसहकृतेन शब्देन कदाचिद् व्यवहारकाले जन्यते। एवम् अशिक्षीतः अपि बालः स्ववयोऽनुरूपं वयस्यैः सह व्यवहरन्तीत्यस्य हेतुरपि प्रतिभैव। एतस्मात् इदानीन्तनी प्राक्तनी च प्रतिभा भवितुमर्हतीति सिद्ध्यति। ''तन्मूल एव इतिकर्तव्यतारूपः सर्वस्य व्यवहारः''[10] इत्युक्त्वा पुण्यराजः अपि इमं पक्षं दृढीकरोति। एवं न केवलं मनुष्याणां किन्तु सर्वेषां प्राणिनां सर्वे व्यवहाराः प्रतिभामूलक एव इति हरिः अभिप्रैति। तद्यथा यदा मधुमासः आगच्छति तदा पुंस्कोकिलः साधारणस्वरस्य स्थाने पञ्मस्वरानुकूलं व्यापारं यत्नं विना कुरुते। तद्वत् लूतादिजन्तवः अपि अन्येभ्यः अभ्यसनं विनैव कुलायादि निर्माणं जानन्ति। एवं प्रत्येकं प्राणिनाम् आहारप्रीत्यपद्वेषप्लवनादिक्रियायाः हेतुरपि प्रतिभैव। तद्यथा स्वस्याहारो भवति मूषिकः इति मार्जारस्य कल्पना, स्वामिनं प्रति शुनकस्य प्रीतिः, अहिनकुलयोः परस्परं द्वेषः, गोमहिष्यादीनां च जले प्लवनक्रिया- इत्यादीनां सर्वेषां व्यवहाराणां मूलभूतहेतुः प्रतिभा भवति। एतस्मात् इयं प्रतिभा जन्मान्तराभ्याससमुपजातहेतुका भवतीति ज्ञातुं शक्यते॥

साहित्याचार्याणां मतमनुसृत्य प्रतिभाभेदाः पूर्वं प्रतिपादिताः। भर्तृहरिणाऽपि षड्विधां प्रतिभामधिकृत्य वाक्यपदीये उच्यते। तद्यथा-

''स्वभावचरणाभ्यासयोगादृष्टोपपादिताम्।
विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः॥'' इति।

ते च स्वाभाविकी प्रतिभा, चरणनिमित्ता प्रतिभा, अभ्यासनिमित्ता प्रतिभा, योगनिमित्ता प्रतिभा, अदृष्टनिमित्ता प्रतिभा, विशिष्टोपहिता प्रतिभा च भवन्ति।[11] एतेषामेकैकस्योदारणानि अधः प्रस्तूयन्ते-

1. स्वाभाविकी प्रतिभा- इयं स्वभावेनैव जायमाना प्रतिभा भवति। कपेः शाखाप्लवनादिषु विद्यमानसामर्थ्यम् अत्र उदाहरणं भवति॥
2. चरणनिमित्ता प्रतिभा- शास्त्रविहितं तपःस्वाध्यायादिसदाचाराः एव अत्र चरणशब्देनोद्दिश्यते। भूवभविष्यद्वर्तमानकालज्ञानादिरूप वसिष्ठादीनां प्रतिभा अत्र उदाहरणं भवति॥
3. अभ्यासनिमित्ता प्रतिभा- अभ्यासेन जायमाना प्रतिभा भवति इयम्। कूपतटाकादिखनकाः कूपतटाकादिखननाभ्यासेनैव क्षितौ तिरेहिता जलनाडीः परिचिन्वन्ति। इयम् अभ्यासनिमित्तप्रतिभायाः उदाहरणं भवति॥
4. योगनिमित्ता प्रतिभा- योगश्चित्तवृत्तिनिरोधः। योगिनां स्वयोगद्वारा पराभिप्रायज्ञानादिरूपा काचिद् प्रतिभा जायते। इयं योगनिमित्तायाः प्रतिभायाः उदाहरणं भवति।
5. अदृष्टनिमित्ता प्रतिभा- अदृष्टनिमित्तायाः प्रतिभायाः कारणम् अदृष्टं भवति। रक्षःपितृपिशाचादीनां परकायप्रवेशान्तर्धानादिषु जायमानदिरूपा भवति अदृष्टनिमित्ता प्रतिभा।
6. विशिष्टोपहिता प्रतिभा- इयं तपोयोगादिसिद्धसम्पन्नैः उपहिता प्रतिभा भवति। महाभारतयुद्धाद्धावसरे बहुदेशव्यापियुद्धवृत्तसम्यग्दर्शनाय सञ्जयादीनां कृष्णद्वैपायनादिभिः उपहिता प्रतिभा अत्र उदाहरणं भवति। एवं षड्विधां प्रतिभामधिकृत्य भर्तृहरिः वदति॥

वस्तुतः अत्र भर्तृहरिणोक्तप्रतिभायाः साहित्याचार्यैरुक्तप्रतिभायाः च भेदो नास्ति। तद्यथा भर्तृहरिणोक्ता स्वाभाविकी प्रतिभैव साहित्याचार्याणां सहजा प्रतिभा। सहजरूपेण अथवा स्वाभाविकेनैव जायमाना प्रतिभा भवति इयम्। एवं हरिणोक्ता चरणनिमित्ता अभ्यासनिमित्ता च प्रतिभा साहित्याचार्याणाम् उत्पाद्यायाम् अथवा औत्पादिक्यां प्रतिभायाम् अन्तर्भवति। आचरणेन अथवा अभ्यासेन उत्पाद्या भवति इयं प्रतिभा। एवं हरिणोक्ता योगनिमित्ता प्रतिभा तेषां कारयित्रीप्रतिभायाः आहार्या इति भेदे अन्तर्भवति। तद्याथा आहार्या प्रतिभायाः उद्बोधनाय अधिकः समयः आवश्यको भवति तथैव योगनिमित्तप्रतिभायाः उद्बोधनाय च। एवं हरिणोक्ता अदृष्टनिमित्ता विशिष्टोपहिता इति प्रतिभाद्वयं साहित्याचार्याणां कारयित्र्या प्रतिभायाः औपदेशिकी इति भेदे अन्तर्भवति इति च वक्तुं शक्यते॥

**उपसंहारः**

वैयाकरणानां मते प्रतिभा नाम वाक्यार्थः भवति। अर्थात् वर्णपदरहिस्य अखण्डस्य अनवयवस्य वाक्यस्य प्रतिभासः भवति प्रतिभा। अत एव सा प्रतिभा बुद्धिस्थो भवतीति कथने दोषो नास्ति। 'प्रतिभा वाक्यार्थः ' इति कथनस्य हेतुरपि अयमेव भवति। वाक्ये विद्यमानानां पदार्थानां अर्थेभ्यः भिन्नरूपा एका प्रतिभा एव वाक्यार्थात् जायते। यथा 'सूर्यः उदयते' इत्यत्र न केवलं सूर्यस्य एवम् उदयतेः किन्तु एतस्मात् भिन्नः एकः अर्थः जायते। अथवा पदं+पदं+ पदं..........= वाक्यम्, पदार्थः+ पदार्थः+ पदार्थः ..........= वाक्यार्थः इति व्युत्पादनं समीचीनं नास्ति। प्रतिभा भवति अत्र कारणम्। सा प्रतिभा सर्वथा असमाख्येया भवति चेदपि अनुभवितुं शक्यते। अत्र पदानाम् अभिधेयार्थः समानो भवति किन्तु प्रत्येकं वाक्येषु प्रयोगसमये पदानां प्रतिभा अर्थः भिन्नो भविष्यति। पश्चाद् वाक्यगतः सामुदायिकी प्रतिभा च भिन्ना भवति॥

अभिधा लक्षणा व्यञ्जना इति तिसृणां वाक्यशक्तीनां समावेशः प्रतिभायां वर्त्तते। भर्तृहरेः ''विच्छेदग्रहणेऽर्थानाम्.....'' इत्युक्तिमनुसृत्य प्रत्येकं प्रयोगेषु प्रयोगानुसारिणी प्रतिभा स्वयमुत्पन्ना भवति चेत् प्रयुक्ते पदे वाक्ये च तत् अभिधेयार्थः सिद्ध्यति। एवं लक्षक-व्यञ्जकवाक्येषु च प्रतिभार्थः वर्त्तते। अत एव वाक्यपदीये प्रतिभास्वरूपवर्णनावसरे भर्तृहरिणा अभिधा लक्षणा व्यञ्जना इति तिस्रः शब्दशक्तीः अधिकृत्य प्रतिपादनं न कृतम्॥

'प्रतिभा वाक्यार्थः' इति पक्षस्य स्वीकारे सति व्याकरणसिद्धान्तस्य मूलं सुदृढं भवति। एवं 'सर्वे सर्वार्थवाचकाः' इति सिद्धान्तः अपि प्रतिभायाः स्वीकारेणैव बलवत्तरो भवति। वस्तुतः 'सर्वे सर्वार्थवाचकाः' इति स्वीकारे प्रतिभायां ये ये अर्थाः उपस्थिताः भवन्ति ते सर्वे अर्थाः शब्दस्यार्थाः भवन्ति। यतः प्रतिभायाः कारणं शब्दो भवति। तस्मात् शब्दात् विशिष्टप्रकाराः अर्थाः प्रकाशन्ते च। यथा मन्त्राणां जपेष्वपि ध्यानस्य इदं महत्वमस्ति यत् आराधकः मन्त्राणामर्थस्य ध्यानं करोति। तद्वारा तस्य मनसि देवतायाः यादृशः आकारः वर्त्तते तादृशाकृतियुक्तायाः देवतायाः साक्षात्कारः भवति। एवमयं प्रतिभाविचारः वैयाकरणानां सर्वसम्मतसिद्धान्तरूपेण प्रतिष्ठितो भवति॥

**टिप्पणी-**

1. काव्यं तु जायते जातु कश्चित् प्रतिभावतः- भामहः- काव्यालङ्कारः- 1-5.
2. नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम्। अमन्दश्चाऽभियोगोऽस्याः कारणं काव्यसम्पदः॥ दण्डिः- काव्यादर्शः-1-203.
3. तस्य च कारणं कविगता केवलं प्रतिभा- जगन्नथपण्डितः- रसगङ्गाधरः- प्रथममाननम्-काव्यकारणम्-पृ-9.
4. सा (शक्तिः) केवलं हेतुरिति यायावरीयः- राजशेखरः- काव्यमीमांसा- चतुर्थोऽध्यायः-पृ-98.
5. प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति- रुद्रटः- काव्यालङ्कारः- 1-16
6. हेमचन्द्रः- काव्यानुशासनः- पृ-4-5.
7. त्रिधा च सा (बुद्धिः) स्मृतिः, मतिः, प्रज्ञा चेति। अतिक्रान्तस्यार्थस्य स्मर्त्री स्मृतिः, वर्तमानस्य स्मर्त्री मतिः, अनागतस्य प्रज्ञात्री प्रज्ञा। सा कवीनामनुपकर्त्री- राजशेखरः- काव्यमीमांसा-पृ-10.
8. नागेशभट्टः- वैयाकरणसिद्धान्तमञ्जूषा- पृ-608.
9. भर्तृहरिः- वाक्यपदीयम्- 2-143.
10. तत्रैव- 2-146 तमकारिकायाः पुण्यराजकृतव्याक्यानम्- पृ-66.
11. भर्तृहरिः- वाक्यपदीयम्- 2-152.

**ग्रन्थसूची**


1. जगन्नथपण्डितः- रसगङ्गाधरः-श्री मदनमोहनझा (व्या), चौकम्बा विद्याभवन्, वाराणसी-221002, चतुर्थं संस्करणम्-1987.
2. नागेशभट्टः- वैयाकरणसिद्धान्तमञ्जूषा-डा. कालिकाप्रसादशुक्लः (सं), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 221002, प्रथमं संस्करणम्-1977.
3. व्याकरणशास्त्रस्येतिहासः- चौखम्बा सुरभारतीप्रकाशन्, वारामसी-221002, चतुर्थं संस्करणम्-1994.
4. भर्तृहरिः- वक्यपदीयम्- वाक्यकाण्डम्, पुण्यराजकृतया टीकया श्रीरघुनाथशर्मप्रणीतया अम्बाकर्त्रीव्याख्यया च सहितम्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 221002, द्वितीयं संस्करणम्-1980.
5. गङ्गाधरन् नायर्.घो.डा. – संस्कृतव्याकरणचरितम्, तृप्पूणित्तुरा, प्रथमं संस्करणम्-1997.